National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2022; 1(40): 223-225
© 2022 NJHSR
www.sanskritarticle.com

डा. लीनाचन्द्रा का
सहायिकाध्यापिका,साहित्यविभागः,
रा.सं.वि.वि., तिरुपतिः

,

Correspondence:
डा. लीनाचन्द्रा का
सहायिकाध्यापिका, साहित्यविभागः,
रा.सं.वि.वि. तिरुपतिः

# जीवानन्दविद्यासागरटीकादिशा काव्यप्रकाशमङ्गलाचरणविमर्शः

**डा. लीनाचन्द्रा का**

ग्रन्थारम्भे मङ्गलाचरणं विधातव्यमिति एकाप्रसिद्धा प्रचीनतमा भारतीयसाहित्यपरम्परा। मङ्गलाचरणमिति आनन्दनीयः शमशिष्टाचारो व्यापारः। अतः इदं निरर्थकं न भवति। एवञ्च तस्य फलं किं विद्यते इति पृच्छयामुत्तरत्वेन मतद्वयमस्ति। प्राथम्यन्तु प्राचीननैयायिकमतं– ग्रन्थरचनायाः प्रारम्भिकं फलन्तु ग्रन्थपरिसमाप्तिः। परन्तु यत्र मङ्गलाचरणं नास्ति तत्र किं ग्रन्थपरिसमाप्तं न भवति इति पूर्वपक्षी। अपि च कृते मङ्गलचारणे ग्रन्थपरिसमाप्तं न दृश्यते इति व्यभिचारः। अतः न च मङ्गलाचरणस्य फलं ग्रन्थपरिसमाप्तिरिति वाच्यम्। अत्र प्राचीननैयायिकानांसमाधानम् – मङ्गलाचरणं विना ग्रन्थपरिसमाप्तिरत्र तत्र जन्मान्तरीयपुण्यवाशाद्ग्रन्थपरिसमाप्तिरिति मन्तव्या। यस्य ग्रन्थस्य सम्पात्तिर्न विद्यते तत्र विघ्नाधिक्यं कारणं वाच्यम्। एवञ्च ग्रन्थस्य मङ्गलाचरणं विघ्ननिराकरणरूपं सहायकं वर्तते। यदि विघ्नानां प्रचुरता भवति तर्हि शास्त्रं न समाप्यते, यदि विघ्नानां स्थाने प्रार्थनानां प्रचुरता भवति तर्हि शास्त्रस्य समाप्तिः भवति। किन्तु नवनैयायिकाणां मते– ग्रन्थसमापणार्थंनैकानि कारणानि भवितुमर्हन्ति। ग्रन्थकर्तुः उपस्थितबुद्धिप्रतिभे चतत्कारणीभूते। परम्परया ग्रन्थस्य विघ्नशङ्कायां मङ्गलाचारणं क्रियते, परन्तु मङ्गलाचरणस्य ग्रन्थस्य निविर्घ्नपिरिसमाप्तिः,रचयितुः,व्याख्यातुः,अध्येतुः, श्रोतुश्च मङ्गलम्,शिष्यशिक्षा,भारतीयपरम्परारक्षा एवञ्च ईश्वरस्य प्रति विश्वासः इत्येतानिपरमप्रयोजनानि भवन्ति।

अस्माकं शास्त्ररचनापरम्परायामपि एषा त्रिपथगा शिवदायिनी स्तुतिमन्दाकिनी सुसमृद्धा प्रवहति। इयमेव भारतीयविश्वकल्याणकारिणी परम्परा रचयितृ-श्रोतृ-आचार्य-शिष्य-पाठक-प्रचारकाणां मङ्गलकारिणी भवति। अतः ग्रन्थारम्भे सरस्वतीसेवकाः शास्त्रमथनप्रवीणाः रचयितारः ग्रन्थस्य निर्विघ्नपरिसमाप्तिकामाः स्वेष्टदेवं लक्ष्यीकृत्य मङ्गलवाक्यानि प्रस्तुवन्ति। केषां मतानुसारेण ग्रन्थस्य निर्विघ्नपरिसमाप्तये ग्रन्थारम्भे ग्रन्थमध्ये ग्रन्थान्ते च मङ्गलाचारणं कर्तव्यमिति। मङ्गलाचारणमिदं नमस्कारात्मकं, आशीर्वादात्मकं,वस्तुनिर्देशात्मकञ्च भवति।

**नियतिकृतनियमरहितां ह्लादैकमयीमनन्यपरतन्त्राम्।**
**नवरसरुचिरां निर्मितिमादधती भारती कवेर्जयति॥**[1]

**नियतिशक्त्यानियतरूपासुखदुःखमोहस्वभावापरमाण्वाद्युपादानकर्मादिसहकारिकारणपरतन्त्राषड्सा न च हृद्यैव तैः तादृशी ब्रह्मणो निर्मितिर्निर्माणम्। एतद्विलक्षणा तु कविवाङ्निर्मितिः अतएव जयति, जयतीत्यर्थेन च नमस्कार आक्षिप्यत इति तां प्रत्यस्मि प्रणत इति लभ्यते।**[2]

वाग्देवतारतारः आचार्यः मम्मटः काव्यप्रकाशाख्यकाव्यशास्त्रग्रन्थस्य प्रारम्भे कविभारतीं परामृशति। तत्र मुख्यं कारणं भवति स्वग्रन्थस्य निर्विघ्नपरिसमाप्तिः। विघ्नविघाताय मङ्गलवाक्यस्य नितरामावश्यकता विद्यते। स्वयं महाभाष्यकारः भगवान् पतञ्जलिराह- **मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते, वीरपुरुषाण्यायुष्मत्पुरुषाणि च भवन्ति अध्येतारश्चसिद्धार्था स्युरिति**[3]**प्रवक्तारो भवन्ती**त्यस्मिन् श्लोके विशेषणचतुष्ट्यद्वारेण आचार्यः प्रमाणयति, यन्नितरां कविसृष्टेराधिक्यं ब्रह्मसृष्टितः वर्तते। तत्रादौ- भारती वागधिष्ठात्री देवता जयति उत्कर्षाश्रयः, उत्कर्षाश्रयत्वसाधकम् अन्यविलक्षणं विशेषणम् आह कवेरिति। कवेः काव्यरूपां निर्मितिम् आदधती

जनयन्ती आङ् पूर्वधाधातोः जननार्थकत्वस्य अपि गर्भाधानादि प्रयोगदृष्टत्वात् काव्यस्य च कविः इव भारती अपि कर्त्री तत्प्रसादेन एवं कविना काव्यकरणात् विशिष्टौ शब्दार्थौच काव्यम् इति ग्रन्थकृदेव वक्ष्यति। जगद्रूपनिर्मितिकृतः ब्रह्मणः वैलक्षण्येन भारत्या उत्कर्षं समर्थयितुंतत्कृतकाव्यरूपनिर्मितेः विशेषणानि अर्थशब्दरुपांशद्वया-वच्छेदेन उपस्थितम् ।

अधुना मया मङ्गलश्लोके विद्यमानानि पदानि समीक्ष्यन्ते।

**• नियतिकृतनियमरहितम्-**

नियतिः अदृष्टं तत्कृतः तन्निरुप्यः नियमः जन्यतालक्षणः तच्छून्याम् अदृष्टाजन्याम् इत्यर्थः। शब्दार्थोभयरूपस्य काव्यस्य अर्थांशे विशेषणम् इदं बोध्यम्। चन्द्रकलात्मकमुखरूपस्य कुन्देन्दुधवलयशौरूपस्य व्यलोकस्य आकाशादिनित्यरूपस्य च काव्यार्थस्य अजन्यत्वेन अदृष्टा-जन्यत्वध्रौव्यात् शब्दांशावच्छेदेन तादृशकाव्यरूपनिर्मित-जनकत्वेन च उत्कर्षः समर्थितः। अतः **निर्मितिमादधती** इत्युक्ता काव्यस्य भारतीजन्यताङ्गीकारे अपि अदृष्टाजन्यताकथनाविरोधः। शब्दांशे जन्यतायाः अर्थविशेषांशे अजन्यतायाश्च अविरुद्धत्वात् एकावच्छेदे एव तयोः विरोधात्। यद्वा नियम्यते इति नियतिः संसारः तत्र कृतः दर्शितः नियमः जले एव पद्मम् इत्यादिरूपः तद्रहितां अभेदेन मुखे भेदेन नायिकायान् अपि कमलवर्णनेन तत्र तादृशनियमरहित्यात्।[4]

**• समीक्षा-**

नियति शब्दस्य अर्थः भवति-**नियम्यन्ते सौरभादयो धर्माः अनयेति नियतिरसाधारणो धर्मः पद्मत्वादिकरूपः**।अर्थात् येन सौराभादयधर्मः नियन्त्रितः, ते पद्मत्वादिरूपो असाधारणधर्मं उच्यन्ते इति नियतिः।नियमेनानेन ब्रह्मसृष्टिर्बद्धा। यद्वा नियम्यते इति नियतिः संसारः तत्र कृतः दर्शितः नियमः जले एव पद्मम् इत्यादिरूपः। तेन निर्मताः नियमाः यथा- यत्र पद्मत्वं तत्र सौरभविशेषः तत्र पद्मत्वं भवति एवञ्च ब्रह्मसृष्टौ विशेषप्रकारका सौरभं विद्यते। एतादृशी प्रकारकाः नियतिकृतनियमः इति कथयन्ति। परन्तु कविसृष्टिः एतत् रहिता। कविः कान्तामुखं पद्मेन साकं तुलयन् तत्र नासावायुं सुरभिपवनत्वेन प्रमाणयति। काव्यजगति कविरेव प्रजापतिः। अतः अग्निपुराणे उक्तम्-

**अपारे काव्यसंसारे कविरेव प्रजापतिः।**
**यथाऽस्मै रोचते विश्वं तथैव परिवर्त्तते॥**
**शृङ्गारी चेत् कविः काव्ये जातं रसमयं जगत्।**
**स एव वीतरागश्चेत् नीरसं सर्वमेव तत्॥**[5]

अस्मिन्काव्यसृष्टौ कविणां वन्धनं नास्ति एव। काव्ये कान्तायाः मुखकमलस्य सौरभं कविप्रतिभायाः व्यज्यते। नियतिशब्दस्य द्वितीयः अर्थः अदृष्टधर्माधर्माः सन्ति। सर्वम् अदृष्ट आधारत्वेन ब्रह्मसृष्टिः भवति। तदनुरूपं सुखदुःखफलं भोक्तुं प्राणिनां पूर्वकृतधर्मार्थं स्वर्गनरकलोकः सृज्यते। परन्तु कविसृष्टिः एतेभ्यः सर्वेभ्यः प्रतिबन्धेभ्यः परा अस्ति। कविः स्वयीकल्पनाशक्त्याएव स्वगैश्वर्येन स्वचरित्रं संयोजयति। इति जीनानन्दविद्यासागरस्य अभिप्रायः वर्तते।

**• ह्लादेकमयीम्-**

ह्लादेति। ह्लादः सुखम् एकः केवलः दुःखासम्मिन्नःयस्मात् काव्यात् तन्मयों तत् स्वरूपाम् इत्यर्थः। यथा नियतिः अदृष्टं ततकृतः ब्रह्मसृष्टो नियमःविशेषः चन्द्रः एव चन्द्रपदप्रयोगात् तद् वृत्त्याह्लादकत्वा-दिधर्माणाम् अपि अपवर्गः इत्येवं रूपः। कविनिर्मितेः तु तद्रहिता मुखे अपि कविना चन्द्रपदप्रयोगे आद्रियते आह्लादत्वावगमात् इति। तथा वेदान्तिनये कार्य्यकारणयोः अभेदः अपि आद्रियते प्रतिभाजन्यका-र्य्यानन्या अभिन्ना एव प्रतिभा तत्परतन्त्रां तज्जन्यां प्रतिभाजन्याम् इत्यर्थः इति तद द्वयम् अपि न। तथाहि चन्द्रः एव चन्द्रपदप्रयोगात् आह्लादकत्वावगमः इत्यस्य कः अर्थः? किं ब्रह्मसृष्टौ अचन्द्रे चन्द्रपदप्रयोगः एव न अस्ति? किं वा प्रयोगसत्वे अपि आह्लादकत्वावगमः न अपि इति? न आद्यः गौर्वाहिकः इतिवत् चन्द्रः मुखम् इति विधेयस्य चन्द्रस्य आदौ प्रयोगे चन्द्रसदृशे अपि चन्द्रप्रयोगस्य सारोपायाः लक्षणायाः ब्रह्मसृष्टौ अपि दृष्टत्वात् तत्र एव चन्द्रनिष्टाह्लादकत्वस्य प्रयोगस्य मुखे प्रतीत्या।[6]

**• समीक्षा-**

ह्लादः सुखम्। ह्लादेन एकमयी सुप्सुपा समासः, एकं सुखात्मकं वस्तु प्राचुर्येन वर्तते यस्य सा एकमयी। अत्र प्राचुर्यार्थे मयट् प्रत्ययः भवति। काव्यप्रकाशस्य प्रदीपटीकानुसारेण प्रभाचीकानुसारेण च एकशब्दः मात्रार्थे स्वार्थे मयट्। ह्लादेन एकमयीम् , एक स्वभावामित्यार्थः। ह्लादमात्रस्वभावामिति यावत् इति अर्थः कृतः। ब्रह्मसृष्टौ सुखदुःखयोः मिश्रणं विद्यते। तदनन्तरं कदापि मोहस्य प्रभावोऽपि दृश्यते। यथा नियतिः अदृष्टं ततकृतः ब्रह्मसृष्टो नियमविशेषेण चन्द्रः एव चन्द्रपदप्रयोगात् तद् वृत्याह्लादकत्वादिधर्माणाम् अपि अपवर्गः इत्येवं रूपं दृश्यते। परन्तु कविर्निर्मितिः सर्वदा रसानन्दं प्रददाति। यता- चन्द्रपदप्रयोगे आद्रियते आह्लादत्वावगमात् इति। चन्द्रः मुखम् इति विधेयस्य चन्द्रस्य आदौ प्रयोगे चन्द्रसदृशे अपि चन्द्रप्रयोगस्य सारोपायाः लक्षणायाः ब्रह्मसृष्टौ अपि दृष्टत्वात् तत्र एव चन्द्रनिष्टाह्लादकत्वस्य प्रयोगस्य मुखे प्रतिताः इति।

**• अनन्यपरतन्त्राम्-**

अनन्येति। अन्यानि स्वभिन्नानि समवाय्यादिकारणानि तत्परतन्त्राः तज्जन्याः ये ब्रह्मसृष्टिरूपाः घटादयः तङ्गिन्नाम् इत्यर्थः। यद्यपि परतन्त्रः पराधीन इति कोषः तथापि अत्र गुरुपरतन्त्रेत्यादिषु इव अधीनभावे तदेकदेशे परतन्त्रपदं निरूढलाक्षणिकं तेन न अन्यपदपौनरुक्तम्। अत्र च अन्यपदं नियतिभिन्नकारणपरम् एव कारणमात्रपरत्वे नियतिकृतेत्यादेः पृथगपादानानुपपत्तेः। न च तत् एवं किमर्थं कृतम् इति वाच्यं ध्वंसस्य समवाय्यसमवायिकारणाभावेन तदजन्यत्वेन तन्निरपेक्षादृष्टजन्यत्वं अर्थरूपकाव्यस्य तु तादृशादृष्ट-जन्यत्वम् अपि नास्ति इत्येतत् प्रतिपादनाय गोवृषन्यायात् पृथगुपादानात्। चक्रवर्ती तु विशेषणद्वयम् इदम् अन्यथा एव व्याचष्टे। तथा अनन्यपदे प्रतिभापरत्वे व्याख्यानम् अपि अयुक्तं वृत्तिविरोधात्। तथाहि ब्रह्मनिर्मितिपरमाखादिकारणपरतन्त्रां तद्विलक्षणा तु कविवा-ङ्निर्मितिः इति लिखने कविनिर्मितेः समवाय्यादिकारणपरतन्तत्वा-भावे लब्धे परतन्त्रपदार्थः एव नञर्थान्वियस्य दर्शितत्वात् न तु अन्यपदार्थः इति।[7]

**• समीक्षा-**

न अन्यस्य परतन्त्रा(पराधीना) या सा अनन्यपरतन्त्रा।परत-न्त्रपदार्थः एव नञर्थान्वियस्य दर्शितत्वात् न तु अन्यपदार्थः इति। ब्रह्मसृष्टौकारणत्रयं विद्यते। यथा- समवायिअसमवायिनिमित्त-कराणानि। परन्तु कविसृष्टिः नान्यस्य परतन्त्रा। पराधीनापेक्षया स्वा-धीनस्योत्कृष्टयोगात् कविसृष्टेः आधिक्यं सर्वजनविदितम्। अत्र कविः सर्वतन्त्रस्वतन्त्रः स्वेच्छया काव्यं निर्माति। अतः सर्वदा वन्दनीयाभवति।

- **नवरसरुचिराम्-**

नवरसेति। नव रसाः यत्र इति बहुव्रीहिणा नवरसेति एकं विशेषणम्, अतः तत्प्रतियोगितया षडरसेति ब्रह्मनिर्मितेः विशेषणं वृत्तौ व्याख्यास्यते अन्यथा एवं षड्सैः न हृद्येत्येव व्याख्येयेत न च वृत्तौ एवं किमर्थं तथा न व्याख्यातम् इति वाच्यं? तथा व्याख्याने नवरसैः रुचिरेत्येव प्रकृते अपि समासः स्यात् अन्यथा व्याख्यानव्याख्येयविसंवादापत्तेः। न च नवभिः रसैः रुचिराम् एवेति समासाश्रयेण तद्दोषानवकाशः इति वाच्यम्? त्रिपदतत्पुरुषस्य व्याकरण निषिद्धत्वात् रुचिरान् इति अपरं विशेषणं आह्लादजनिकाम् इति अर्थकम्। न च इदं विशेषणं कथं ब्रह्मनिर्मितिवैलक्षण्यसाधकं ब्रह्मनिर्मितेः अपि रुचिरत्वात् इति वाच्यं? रुचि राम् एव इति नियमगर्भत्वे बैलक्षण्यसाधकत्वात्। अतएव न च हृद्यैव तैः इति ब्रह्मनिर्मितौ हृद्यत्वे नियमाभावः दर्शयिष्यते। न च एवं द्वादशमात्रजनिकाम् इति अर्थपर्य्यवसाने ह्लादैकमयम् इत्यनेन सह पौनरुक्त्यम् इति वाच्यम्? तत्र अलङ्काराधीन ह्लादस्य अत्र च रसाधीनह्लादस्य विवक्षितत्वेन अपोनरुक्त्यात्। अत एव न च हृद्यैव तैः इति व्याख्यया रसाधौनह्लादः विवक्षितः शृङ्गारादिरसनवकमधुरादिरसषट्कयोः भेदे अपि श्लिष्टरसपदमहिम्ना एकत्वावभासात्। यद्यपि रसरुपह्लादः वक्ष्यते तथापि रसव्यक्तीनां धारावाहित्वेन पूर्वरसव्यक्त्या अपररसव्यक्तिजननात् रसाधीनत्वंह्लादस्य बोध्यम्। न च एवं रसैः हृद्यमात्रत्वाभावप्रदर्शनात् नवरसैः रुचिरान् इत्येव समासः प्रदर्शितः इति वाच्यम्? पृथग्रसपदार्थापेक्षेण एव तत्पदर्शनात् कवेः भारती इति अन्वयं आदधती इत्यत्र अपि कवितरीति अध्याहारश्च आह चक्रवर्ती आधानं स्वयं निर्माय कवितर्य्यर्पणन् इति चाह। तत् न।कवेः निर्मितिम् इति अन्वयेन एव आधानस्य जननरूपत्वेन एव च सर्वसामञ्जस्ये कवितरीति अध्याहारस्य भारत्याःकविनिरपेक्षकर्तृत्वकल्पनस्य च गौरवग्रस्तत्वात् ब्रह्मनिर्मितेः विशेषणप्रदर्शनेन तद्विपरीते कविनिर्मितिविशेषणे भारत्या उत्कर्षं समर्थयितुं ब्रह्मनिर्मितेः विशेषणानि आदौआक्षिप्य आह नियतिशक्येति। नियतेः अदृष्टस्य शक्त्या सामर्थ्येन नियतरूपा पापात् दुःखी पुण्यात् सुखी इत्येवं नियमविशिष्टा इत्यर्थः। मदीयद्वितीयव्याख्यानुमते तु नियतौ संसारे शक्या नियमेन जले एवं पद्मम् इत्येवं नियतरूपा इत्यर्थः। सुखेति मोहान्तपदम् अत्र तज्जनकपदं बोध्यम् परमाणुवादीत्यादि पदात् ह्याणुककपालिकाक-पालादिपरिग्रहः। एतानि समवायिकारणानि उपादानं समवायिकारणं कर्म कुम्भकारादेः क्रिया आदिपदात् समवायीतरसमस्तकारणपरिग्रहः तानि सहकारिकारणानि ब्रह्मणः निर्मितिः इति आक्षिप्तनिर्मितिपदम् उपादाय व्याचष्टे निर्माणमिति। कृद्विहितभावत्वात् निर्मीयमाणघटाद्यर्थकम्। श्लोकस्थविशेषणानि अधुना व्याचष्टे एतद्विलक्षणा तु इति, वाङ्निर्मितिः वागुपनिबद्धा शब्दार्थात्मक काव्यरूपा निर्मितिः।[8]

- **समीक्षा-**

ब्रह्मणः सृष्टौ षड् रसाः भवन्ति। यथा – मधुर-अम्ल-लवण-कटु-कषाय-तिक्ताश्च। परन्तु कविसृष्टौ शृङ्गार-हास्य-करूण-रौद्र-वीर-भयानक-वीभत्स-अद्भुत-शान्तश्चेति नवरसाः भवन्ति। अत्र सर्वे रसाः आनन्ददायकाः एव किन्तु ब्रह्मणसृष्टेः सर्वे रसाः तथा न भवन्ति। अपि तु अप्रिया अपि भवन्ति। अतएव कविसृष्टिः विलक्षणा वर्तते। तथा च करुणादिरसाः अपि आनन्ददायकाः इति साहित्यदर्पणकारेण उक्तं –

**करुणादावपि रसे जायते यत् परं सुखम्।**
**सचेतसामनुभवः प्रमाणं तत्र केवलम्॥**[9]

किञ्च शत्रुकृतेन श्लोकोऽपि रसास्वादकाले आनन्ददायी यतः स्वपरभावनारहितः सहृदयः रसास्वादनं क्रियते। अतः कविमिर्मितिः काव्यं उत्कृष्टतरा भवति। उक्तविशेषणवैलक्षण्यात् सिद्धं जातमिति - ब्रह्मणः सृष्टौ कटु-तिक्ताम्लादिरसाः न सर्वेषां हृद्या भवन्ति किन्तु नवरसप्राणरूपा कविभारती सर्वानन्दकारिणी जयति। एतादृशीं नियतिकृतनियमरहितां ह्लादैकमयीम् अनन्यपरतन्त्रां नवरसरुचिरां निर्मितिमादधती कविभारती। तस्या उत्कृष्टत्वमात्र वाग्देवतावतारेण प्रतिपाद्यते। जयतीति पदेन नमस्कार आक्षिप्यते।

अस्मिन् मङ्गलश्लोकेगीतिः छन्दः। उपमानभूतब्रह्मणः सृष्ट्यापेक्षा उपमेयभूतकविभारत्याः सृष्टौ चतुर्धा आधिक्यं दर्शितवान्। अतः अत्र व्यतिरेकालङ्कारोऽस्ति कवेर्भारती अस्य अर्थद्वयं भवितुं सक्नोति। एकः कवेः भारती अर्थात् काव्यम्। द्वितीयः कवेः भारती अर्थात् तस्य आराध्यदेवता सरस्वती। कविभारतिविषयक रतिभावश्च व्यङ्ग्यरूपेण विद्यते। येन आचार्यमम्मटस्य भारतीं प्रति नमस्कारः संसूचितो भवति।

अनेनैव प्रकारेण मया अल्पमतिना स्वबुद्ध्या काव्यप्रकाशकृन्मङ्गलाचरणस्य विमर्शः विहितः।

**सन्दर्भग्रन्थसूची**

१.**काव्यप्रकाशः** – श्रीमम्मटाचार्यविरचित काव्यप्रकाशकी हिन्दी व्याख्या-ज्ञानमण्डल लिमिटेड, वाराणसी-२२१००१ -(१९६०)।

२.**काव्यप्रकाशः**-श्रीमम्मटभट्टविरचितः-श्रीजीवानन्दविद्यासागरभट्टाचार्येण प्राचीनां व्याख्यामवलम्वण सङ्कलितया व्याख्या समङ्क्षतः (द्वितीयसंस्करणम्)–कलिकातानगरे, कलिकाता यन्त्रे मुद्रितः- १८६७।

३.**साहित्यदर्पणम्**-श्रीविश्वनाथकविराजप्रणीतः- चौखम्बा सुरभारती प्रकाशन वाराणसी।

४.**वैयाकरण-सिद्धान्तकौमुदी**- श्रीभट्टोजिदीक्षितविरचिता - चौखम्बा संस्कृत संस्थान- वाराणसी।

**पादटिप्पणिः**

**१.** का.प्र.- १.१
**२.** का.प्र.१.१
३. महा.भा-६१पृ
४. जीवानन्दविद्यासागरटीका-४-५ पृ
५. अग्नि.पु- ३३९.१०
६. जीवानन्दविद्यासागरटीका-५ पृ
७. जीवानन्दविद्यासागरटीका-५-६ पृ
८. जीवानन्दविद्यासागरटीका-६-७ पृ
९. सा.द.- ४-५.६